Substance, palm-leaf. Size, 11¾ × 1¼ inches. Pages, 48. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins towards the close of the 6th Adhyāya and breaks off in the 9th Adhyāya.

No. 2004. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $9\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 56. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 1, 10, 11, and 15 imperfect. Begins on fol. 1*a*. The other work herein is Rāmacandrāṣṭōttaraśatanāmastōtram 29*a*.

No. 2005. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $6\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 159. Lines, 8 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Adhyāyas 1 to 17.

The other work herein is Sūryāṣṭōttaraśatanāmastōtram 80*b*.

No. 2006. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $11\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 86. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

No. 2007. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $11\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 336. Lines, 5 on a page. Character, Nandināgarī. Condition, fair. Appearance, old.

Incomplete.

Many leaves are lost including the first.

No. 2008. भगवद्गीता—कर्णाटकटीकासहिता.

BHAGAVADGĪTĀ WITH KANARESE ṬĪKĀ.

Substance, palm-leaf (Śrītāla). Size, 9 × $1\frac{7}{8}$ inches. Pages, 136. Lines, 8 on a page. Character, Kanarese. Condition, fair. Appearance, old.

The text with meaning in Kanarese. Adhyāyas 3 to 13. Many leaves are missing.

No. 2009. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $12\frac{7}{8}$ × $1\frac{1}{4}$ inches. Pages, 34. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Madhvavijayam fol. 18*a*.

Adhyāyas 1 to 15.

No. 2010. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 12 × $1\frac{5}{8}$ inches. Pages, 50. Lines, 9 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tantrasārasaṅgrahaḥ 26*a*.

Complete.

No. 2011. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $18\frac{5}{8}$ × $1\frac{5}{8}$ inches. Pages, 61. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Complete; with Ṛsicchandōdēvata given at the beginning.

No. 2012. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 12½ × 1½ inches. Pages, 60. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Uttaragītā 31*a*.

Complete.

No. 2013. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 16⅞ × 1⅛ inches. Pages, 146. Lines, 4 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete; with Ṛsicchandōdēvatā given at the beginning.

No. 2014. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 16¼ × 1⅝ inches. Pages, 41. Lines, 8 on a page. Character, Telugu. Condition, fair. Appearance, new.

Begins on fol. 1*a*. The other works herein are Garbhagītā 21*b*, Gītāsāraḥ 22*a*, Śivagītā 27*a*, Rājayōgāmṛtam 44*a*.

Complete.

No. 2015. भगवद्गीता—आन्ध्रटीकासहिता.

BHAGAVADGĪTĀ WITH TELUGU ṬĪKĀ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 238. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete; with Telugu meaning.

Telugu meaning given by Tirumalai Aiyaṅgār, son of Talapāka Annamācārya.

No. 2016. भगवद्गीता—आन्ध्रटीकासहिता.

BHAGAVADGĪTĀ WITH TELUGU ṬĪKĀ.

Substance, palm-leaf. Size, 17 × $1\frac{1}{4}$ inches. Pages, 226. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Adhyāyas 1 to 16; complete. In the beginning 3 leaves are lost.

No. 2017. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $16\frac{1}{4}$ × $1\frac{1}{4}$ inches. Pages, 75. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhagavadgītā-vacanam in Telugu 39*a*.

Complete.

No. 2018. भगवद्गीता—कर्णाटकटीकासहिता.

BHAGAVADGĪTĀ WITH KĀNARESE ṬĪKĀ.

Substance, palm-leaf. Size, $18\frac{3}{4}$ × $1\frac{5}{8}$ inches. Pages, 121. Lines, 7 on a page. Character, Kanarese. Condition, fair. Appearance, old.

The text with Kanarese meaning. Adhyāyas 1 to 12.

No. 2019. भगवद्गीता—कर्णाटकटीकासहिता.

BHAGAVADGĪTĀ WITH KĀNARESE ṬĪKĀ.

Substance, palm-leaf. Size, $16\frac{5}{8}$ × $1\frac{3}{8}$ inches. Pages, 130. Lines, 7 on a page. Character, Kanarese. Condition, slightly injured. Appearance, new.

Adhyāyas 1 to 3, complete.

Another copy of the Bhagavadgītā containing two Adhyāyas in 30 pages of 4 lines each, the leaves being in size 13 × $1\frac{1}{4}$ inches and the character being Nandināgarī.

No. 2020. भगवद्गीता—कर्णाटकटीकासहिता.
BHAGAVADGĪTĀ WITH KANARESE ṬĪKĀ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 63. Lines, 11 on a page. Character, Kanarese. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Pāṇḍavanītiḥ 32*b*.

Complete.

Copying finished on Monday the 15th of Phālguna-Śuddha in the year Rudhirōdgāri.

No. 2021. भगवद्गीता.
BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 67. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 11*a*. The other works herein are Uttaragītā 1*a*, Bhīṣmastavarājaḥ 45*a*, Anusmṛtiḥ 51*a*, Viṣṇubhujaṅgaprayātastōtram 55*a*.

Complete with Ṛṣicchandōdēvatā.

No. 2022. भगवद्गीता.
BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 57. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 88*a*. The other works herein are Bhagavadgītāvyākhyā Gītārthasaṅgrahaḥ 1*a*, Uttaragītā 117*a*.

Complete.

No. 2023. भगवद्गीता.
BHAGAVADGĪTĀ.

Substance, paper. Size, $5\frac{1}{8} \times 3\frac{5}{8}$ inches. Pages, 68. Lines, 14 on a page. Character, Telugu. Condition, fair. Appearance, old.

Illegibly written.

Breaks off in the 12th Adhyāya.

No. 2024. भगवद्गीता—आन्ध्रटीकासहिता.

BHAGAVADGĪTĀ WITH TELUGU ṬĪKĀ.

Substance, paper. Size, $7\frac{1}{4} \times 4\frac{5}{8}$ inches. Pages, 442. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Bound in the wrong order. Four leaves in the beginning are lost.

Complete.

No. 2025. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $5\frac{1}{2} \times 3\frac{3}{8}$ inches. Pages, 398. Lines, 5 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Begins on fol. 1*b*. The other works herein are Viṣṇusahasranāmastōtram 201*b*, Bhīṣmastutiḥ 250*b*, Anusmṛtiḥ 281*b*, Gajēndramōkṣaḥ 307*b*.

No. 2026. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, paper. Size, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Pages, 578. Lines, 10 on a page. Character, Dēvanāgarī. Condition, fair. Appearance, old.

Adhyāyas 1 to 11.

The text with a Ṭīkā in verse in Marāthi by Jñānadēva. The Ṭīkā goes by the name of Jñānēśvarī.

No. 2027. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, paper. Size, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Pages, 605. Lines, 10 on a page. Character, Dēvanāgarī. Condition, fair. Appearance, old.

Adhyāyas 12 to 18.

The second volume with reference to the MS. described under the last number.

No. 2028. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, paper. Size, $6\frac{1}{2} \times 3\frac{1}{2}$ inches. Pages, 40. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Bhagavadgītāphalaśrutiḥ 21*a*, Kṛṣṇastavarājaḥ 23*a*, Kṛṣṇānusmṛtiḥ 32*b*.

Adhyāyas 11 to 18.

No. 2029. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, paper. Size, $13 \times 7\frac{7}{8}$ inches. Pages, 88. Lines, 20 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

A list of errata is found at the end.

No. 2030. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, paper. Size, $10\frac{1}{2} \times 6$ inches. Pages, 850. Lines, 13 on a page. Character, Dēvanāgarī. Condition, fair. Appearance, old.

The text with Ṭīkā in the Marāthi language. Same as No. 2026.

Complete.

शके १६११, प्रमोदूतनामसंवत्सरे दक्षिणायने कार्तिकमासे शुक्लपक्षे तृतीयायां तिथौ भार्गववासरे तद्दिने श्रीमद्भगवद्गीतालेखनं समाप्तम् ॥ स्वहस्ताक्षर महाद्वैत काशीतमाजी ॥

No. **2031.** भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf (Śrītāla). Size, 10 × 1⅞ inches. Pages, 78. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 28*a*. The other work herein is Tattvaśēkhara 1*a*. Complete.

No. **2032.** भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 9⅜ × 1½ inches. Pages, 56. Lines, 12 on a page. Character, Grantha. Condition, injured. Appearance, not new.

Begins on fol. 82*a*. The other works herein are Śrībhāṣyam 1*a*, Saṅkṣēparāmāyaṇam 77*a*, Gadyatrayam 110*a*, Gṛhārcāpratiṣṭhāvidhiḥ 118*a*, Ātmarakṣābharasamarpaṇam 125*a*, Sudarśanapāñcajanyapratiṣṭhāvidhiḥ 141*a*, Pañcasaṁskāraprayōgaḥ 148*a*, Bōdhāyanakūśmāṇḍahōmaprayōgaḥ 152*a*.

No. **2033.** भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 11⅝ × 1¼ inches. Pages, 16. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 7*b*. The other works herein are Amarukavyākhyā 1*a*, Āpastamabapūrvaprayōgaḥ 15*a*.

Adhyāyas 10 and 11, the latter being incomplete.

No. **2034.** भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 11¼ × 1⅜ inches. Pages, 107. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

No. 2035. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $8\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 114. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Almost complete; breaking off in the colophon of the last Adhyāya.

No. 2036. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $7\frac{7}{8} \times 1\frac{1}{2}$ and $9\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 20 and 26. Lines, 7 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhagavadgītā-sāraḥ 23*a*, Bhagavadgītāmāhātmyam 25*a*, Garbhagītā 28*a*, Gōpikāgītā fol. 30*a*.

Adhyāyas 10 and 11. Two copies.

No. 2037. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $9\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 2. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 13*a*. The other works herein are Śyāmalādaṇḍakam 1*a*, Dēvīstutiḥ 7*b*, Dēvyaṣṭōttaraśatanāmastōtram 8*a*, Dēvīstutiḥ 9*b*, Laghuśyāmalāmantraḥ 12*a*, Bālāstutiḥ 14*a*, Ādityahṛdayam 16*a*, Mīnākṣīstutiḥ 17*a*, Kṛṣṇāṣṭōttaraśatanāmastōtram 18*a*, Vārāṇasīstōtram 19*a*, Annapūrṇēśvarīstutiḥ 20*a*, Gaṅgāstutiḥ 21*a*, Kālabhairavāṣṭakam 21*b*

13th Adhyāya, incomplete.

No. 2038. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 8. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 81*a*. The other works herein are Pārijātaharaṇa-vyākhyā 1*a*, Madhvāṣṭakam 44*a*, Vēṅkaṭagirimāhātmyam 45*a*, Viṣṇusahasranāmastōtram 120*a*, Raghuvaṁśam 128*a*, Garuḍa pañcamīvratavidhiḥ 134*a*, Śivarātrīvratavidhiḥ 135*b*.

Complete. This contains the Ṛṣicchandōdēvatā, etc., in the beginning, and a list giving the number of stanzas in each Adhyāya at the end, which is followed by a few stanzas treating of the greatness of the Gītā.

No. 2039. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, paper. Size, 6⅝ × 3⅝ inches. Pages, 250. Lines, 5 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

The last five Ślōkās in the 18th Adhyāya are wanting. Ṛṣicchandōdēvatā and Aṅganyāsakaranyāsa in the beginning. Same as the above.

No. 2040. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 7½ × 1⅛ inches. Pages, 126. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 77*a*. The other works herein are Tattvanirṇayaḥ 1*a*, Subrahmaṇyabhujaṅgastōtram 7*a*, Rāmakavacam 15*a*, Bālāparamēśvarīmālāmantraḥ 19*a*, Āpastambapūrvaprayōgaḥ 23*a*, Sūryanamaskāraḥ 37*a*, Navagrahajapam 40*a*, Puṣpavīrāñjalistōtram 45*a*, Makarandastavaḥ 48*a*, Ātmamānasikapūjā 52*a*, Rajassvalāmantraḥ 55*a*, Mānasikasnānam 58*a*, Mēdhādīkṣāprakaraṇam 60*a*, Uttaragītā 65*a*, Vivāhakūṭadaśakam 140*a*, Tripurasundarīṣōḍaśīmahāmantrasahasranāmastōtram 147*a*, Śivastōtram 174*a*.

Ṛṣicchandōdēvatā and Aṅganyāsakaranyāsa in the beginning.

Complete.

No. 2041. भगवद्गीता.

BHAGAVADGĪTĀ.

Pages, 88. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 369. Ṛṣicchandōdēvatā and Aṅganyāsakaranyāsa in the beginning. Complete.

No. 2042. भगवद्गीता—कर्णाटकटीकासहिता.

BHAGAVADGĪTĀ WITH KANARESE COMMENTARY.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 737. Lines, 5, on a page. Character, Kanarese. Condition, injured. Appearance, old.

Complete.

No. 2043. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf (Śrītāla). Size, $8\frac{5}{8} \times 2\frac{5}{8}$ inches. Pages, 28. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Dayāśatakam 15*a*, Gadyatrayam 20*a*, Abhītistavaḥ 23*a*, Śrīguṇaratnakōśaḥ 24*a*, Raghuvīragadyam 27*a*, Daśāvatārastōtram 28*b*, Dēśikaprapattiḥ 29*a*, Śrīraṅgarājaprapattiḥ 29*b*, Vēṅkaṭēśaprapattiḥ 30*a*, Dēvarājaprapattiḥ 30*b*, Dēśikamaṅgalāśāsanam 31*a*, Vēṅkaṭēśamaṅgalāśāsanam 31*b*, Aṣṭōttaradivyadēśanāmāni 32*a*, Nyāsadaśakam 32*b*, Nyāsatilakaḥ 33*a*, Bhagavaddhyānasōpānam 34*b*, Gōpālaviṁśatistōtram 35*a*, Rāmānujāṣṭakam 36*a*, Yatirājasaptatiḥ 86*a*, Aṣṭabhujāṣṭakam 39*a*, Mukundamālā 39*b*, Nyāsaviṁśatistōtram 41*b*, Sudarśanaśatakam 43*a*, Bhāgavatam 50*a*, Nārāyaṇahṛdayam 52*a*, Ādyādimahālakṣmīhṛdayam 53*a*, Dharaṇīstōtram 57*a*, Nārāyaṇakavacam 57*b*, Ādityahṛdayam 58*a*, Bhāgavatam 59*a*.

Complete.

No. 2044. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $9\frac{5}{8} \times 1$ inches. Pages, 106. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Two leaves in the beginning and one at the end are broken.

Complete.

No. 2045. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $8\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 97. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 8.

Ṛsicchandōdēvatā in the beginning.

No. 2046. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $9\frac{7}{8} \times 1\frac{5}{8}$ inches. Pages, 55. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhagavadgītā-māhātmyam 28*b*, Bhāratasāvitrī 30*a*.

Complete.

The Pūrvapaṭhanīya stanzas and the Ṛsicchandōdēvatā are given.

No. 2047. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $7\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 96. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Dated : जयाब्दे फाल्गुने मासे पौर्ण(पूर्णि)मायां स्थिरवासरे.

No. 2048. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, paper. Size, 12⅜ × 7¾ inches. Pages, 467. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new. Complete.

A commentary on the Bhagavadgītā by Śaṅkarācārya.

Ṛṣicchandōdēvatā, &c., in the beginning.

Beginning:

सर्वभूतान्तरस्थायिचैत्यमुक्तचिदात्मने ।
प्रत्यक्चेतनरूपाय मह्यमेव नमो नमः ॥

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

अस्य श्रीगीताशास्त्रप्रकाशमन्त्रस्य प्रायेणानुष्टुप्छन्दः, क्वचिन्नानाछन्दांसि, श्रीवेदव्यासभगवानृषिः, श्रीकृष्णः परमात्मा देवता । अशोच्यानन्वशोचस्त्वमिति बीजम्, सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेति शक्तिः, अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति कीलकम्, श्रीकृष्णार्थे विनियोगः; श्रीमद्ज्ञानात्मने कृष्णाय हृदयाय नमः, श्रीमदैश्वर्यात्मने छन्दसे शिरसे स्वाहा, श्रीमच्छक्त्यात्मने वेदव्यासाय शिखायै वषट्, श्रीमद्बलात्मने बलभद्राय कवचाय हुम्, श्रीमत्तैजसात्मने कृष्णाय नेत्रत्रयाय वौषट्, श्रीमद्वीर्यात्मने गाण्डीवधन्विने अर्जुनाय अस्त्राय फट् ।

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सस्सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

वाचकः प्रणवो यस्य क्रीडावस्त्वखिलं जगत् ।
श्रुतिराज्ञा वपुर्ज्ञानी(नं) तं वन्दे देवकीसुतम् ॥

सारथ्यमर्जुनस्याजौ कुर्वन्गीतामृतं ददौ ।
लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः ॥

वन्दे कृष्णार्जुनौ वीरौ नरनारायणावुभौ ।
धृतराष्ट्रकुलोन्मत्तगजारोहणवल्लभौ ॥

करकलितनिदर्शितात्ममुद्रः परिकलितोन्नतबर्हिबर्हचूडः ।
इतरकरगृहीतयोक्त्रतोत्रो मम हृदि सन्निधिमातनोतु शौरिः ॥

प्रालम्बसूत्रेण सहार्वसूत्रं यस्तोत्रमुद्रां करपल्लवेन ।
प्रदर्शयन्नाह पता(दा)र्थतत्त्वं पार्थाय तत्सारथये नमोऽस्तु ॥

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अफाललोचनश्शम्भुर्भगवान् बादरायणः ॥

मुनिं स्निग्धाम्बुदाभासं वेदावासमकल्मषम् ।
वेदावासं सरस्वत्यावासं व्यासं नमाम्यहम् ॥

तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं चर्माम्बरं शिवविरिञ्चिनुतं वरेण्यम् ।
कृष्णत्विषं कनकपिङ्गजटाकलापं व्यासं नमामि शिरसा तिलकं मुनीनाम् ॥

पाराशर्यवचस्सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासम्बोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपयिमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ॥

पार्थाय प्रतिपादितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।

अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यीयिनी-
मम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥

धृतराष्ट्र उवाच :—

(मू.)

१. धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

सञ्जय उवाचः—

२. दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥

३. पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्द(द्रु)पदपुत्रेण तव शिष्येण धीमता ॥

* * * *

सञ्जय उवाचः—

९. एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥

१०. तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥

श्रीभगवानुवाच :—

(व्या.)

नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तस्त्विमे लोकास्सप्तद्वीपा च मेदिनी ॥

स भगवान् सृष्ट्वेदं जगत्तस्य च स्थितिं चिकीर्षुर्मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम् । ततोऽन्यांश्च

सनकसनन्दनादीनुत्पाद्य निवृत्तिधर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास। सः द्विविधो हि वेदोक्तधर्मः—प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च। जगत्स्थितिकारणं प्राणिनामभ्युदयनिश्श्रेयसहेतुर्यस्स धर्मो ब्राह्मणाद्यैर्वर्णिभिराश्रमिभिश्चानुष्ठीयमानो दीर्घेण कालेनानुष्ठातॄणां कामोद्भवाद्धीयमानविज्ञानहेतुकेनाधर्मेणाभिभूयमाने धर्मे, प्रवर्धमाने चाधर्मे जगत्स्थितिं परि(पि)पालयिषुस्स आदिकर्ता नारायणाख्यो विष्णुः भौमस्य ब्रह्मणो ब्राह्मणत्वस्याभिरक्षणाय देवक्यां वसुदेवादंशेन किल सम्बभूव। ब्राह्मणत्वस्य हि रक्षणे रक्षितस्स्याद्वैदिको धर्मः ; तदधीनत्वात् वर्णाश्रमभेदानाम्। स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिस्सदा सम्पन्नस्त्रिगुणात्मिकां वैष्णवीं स्वां मायां प्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरोऽपि नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव जात इव लोकानुग्रहं कुर्वन् लक्ष्यते। स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया वैदिकं धर्मद्वयमर्जुनाय शोकमोहमहोदधौ निमग्नायोपदिदेश । गुणाधिकैर्गृहीतोऽनुष्ठीयमानश्च धर्मः प्रचयं गमिष्यतीति तं धर्मं भगवता यथोपदिष्टं भगवान् वेदव्यासः सर्वज्ञो गीताख्यैस्सप्तभिः श्लोकशतैरुपनिबबन्ध। तदिदं गीताशास्त्रं समस्तवेदार्थतत्त्वसङ्ग्रहभूतं दुर्विज्ञेयार्थं तदर्थाविष्करणायानेकैर्विवृतपदार्थवाक्यार्थन्यायमप्यत्यन्ताविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्धारणार्थं सङ्क्षेपतो विवरणं करिष्यामि ।

End :

पाण्डवानां पक्षे श्रीः विजयः परः, तथैव भूतिः श्रियो विशेषः। धृ(ध्रु)वा अव्यभिचारिणी। नीतिरित्येवं मतिर्ममेति ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीशङ्करभगवत्पादकृतौ श्रीभगवद्गीताभाष्ये अष्टादशोऽध्यायः ॥

१. गोविन्दं कृष्णमनिशं गोपीजनमनोहरम् ।
वन्दे पार्थरथारूढं ज्ञानमुद्रालसत्करम् ॥
२. सर्वभूतान्तरस्थाय चैत्यमुक्तचिदात्मने ।
प्रत्यक्चेतनरूपाय मह्यमेव नमो नमः ॥
३. ईश्वरो गुरुरात्मेति मूर्तिभेदाद्विभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥
४. देहेन्द्रियानुहीनाय मानदूरस्वमूर्तये ।
ज्ञानानन्दस्वरूपाय दक्षिणामूर्तये नमः ॥

शङ्करभाष्यं समाप्तम् ॥

No. 2049. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{1}{2}$ inches. Pages, 109. Lines, 29 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. *1a*. The other work herein is Vātsyāyanasūtram 57*a*.

Breaks off in the 14th Adhyāya.

Same work as the above.

No. 2050. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 320. Lines, 10 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

Same as the above.

No. 2051. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 519. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old,

Complete. Same as the above.

No. 2052. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 106. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 7th Adhyāya.

Same as the above.

No. 2053. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, paper. Size, $7\frac{5}{8} \times 15\frac{1}{2}$ inches. Pages, 391. Lines, 13 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete.

Transcribed by Dulla Śrīnivāsa. Dated: the 12th of Adhika-Vaiśākha of Āṅgirasa.

Same as the above.

No. 2054. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 226. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the 9th Adhyāya.

Same as the above.

No. 2055. भगवद्गीताभाष्यविवेचनम्.

BHAGAVADGĪTĀBHĀṢYAVIVĒCANAM.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 497. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

This is a gloss on the Bhāṣya of Śaṅkarācārya by Ānandajñāna or Ānandagiri, pupil of Śuddhānanda.

Beginning:

दृष्टिं मयि विशिष्टार्थे कृपापीयूषवर्षिणीम् ।
हेरम्ब देहि प्रत्यूहक्ष्वेळव्यूहनिवारिणीम् ॥

यद्वक्त्रपङ्केरुहसम्प्रसूतं गीतामृतं विश्वविभागनिष्ठम् ।
साध्येतराभ्यां परिनिष्ठिताभ्यां तं वासुदेवं प्रणतोऽस्मि नित्यम् ॥

प्रत्यक्षमच्युतं नत्वा गुरूनपि गरीयसः ।
क्रियते शिष्यशिक्षायै गीताभाष्यविवेचनम् ॥

कर्मनिष्ठा ज्ञाननिष्ठेत्युपायोपेयभूतनिष्ठाद्वयमधिकृत्य प्रवृत्तं गीताशास्त्रं व्याचिख्यासुर्भगवान् भाष्यकारः विघ्नोपप्लवप्रशमनादिप्रयोजनप्रसिद्धये प्रामाणिकव्यवहारप्रमाणकमिष्टदेवतातत्त्वानुस्मरणं मङ्गळाचरणं सम्पादयन् अनवशेषेणेतिहासपुराणयोर्व्याचिख्यासितगीताशास्त्रेणैकवाक्यतामभिप्रेत्य पौराणिकमेव श्लोकंमन्तर्यामिविषयमुदाहरति नारायण इति ।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायसं(नं)पूर्वं तेन नारायणस्स्मृतः ॥"

इति स्मृतिप्रसिद्धः स्थूलदृशां नारायणशब्दार्थः । सूक्ष्मदर्शिनः पुनराचक्षते—नरशब्देन चराचरात्मकं शरीरमुच्यते । तत्र नित्यसन्निहिताश्चिदाभासा जीवा नारा निरुच्यन्ते । तेषामयनमाश्रयोऽन्तर्यामी नारायण

इति । यमधिकृत्यान्तर्यामिब्राह्मणं श्रीनारायणाख्यं मन्त्राम्नायं चाधीयते ; तदनेन शास्त्रप्रतिपाद्यं विशिष्टं तत्त्वमादिष्टं भवति । ननु परस्यात्मनो मायासम्बन्धादन्तर्यामित्वं शास्त्रप्रतिपाद्यत्वं च वक्तव्यम्; अन्यथा कूटस्थासङ्गाविषयाद्वितीयस्य तदयोगात् ।

End:

राज्ञो धृतराष्ट्रस्य स्वपुत्रेषु विजयाशां शिथिलीकृत्य पाण्डवेषु जयप्राप्तिमैकान्तिकीमुपसंहरति इत्येवमिति । उपायोपेयभावेन निष्ठा (द्वय)-स्य प्रतिष्ठापितत्वात्कर्मनिष्ठा परम्परया ज्ञाननिष्ठाहेतुः; ज्ञाननिष्ठा साक्षादेव मोक्षहेतुरिति शास्त्रार्थमुपसंहर्तुमित्युक्तम् ।

काण्डत्रयात्मकं शास्त्रं (पदवाक्यार्थगोचरम्) ।
आदिमध्यान्तषट्केषु व्याख्याया गोचरीकृतम् ॥
सङ्क्षेपविस्ताराभ्यां यो लक्षणैरुपपादितः ।
सोऽर्थोऽन्तिमेन सङ्क्षिप्य लक्षणेन विवक्षितः ॥

गीताशास्त्रमहार्णवोत्थममृतं वैकुण्ठकण्ठोद्भवं
श्रीकन्दा(ण्ठा)परनामवन्मुनिकृतं निष्ठाद्वयद्योतितम् ।
निष्ठा यत्र मतिप्रसादजननी साक्षात्कृतिं कुर्वती
मोक्षे पर्यवसास्यति प्रतिदिनं सेवध्वमेतद्बुधाः ॥

प्राचामाचार्यपादानां पदवीमनुगच्छताम् ।
गीताभाष्ये कृता वी(टी)का वी(टी)कतां पुरुषोत्तमम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यश्री-भगवदानन्दज्ञानविरचिते श्रीभगवद्गीताभाष्यविवेचने अष्टादशोऽध्यायस्समाप्तः ॥

No. 2056. गीताभाष्यटीका.

GĪTĀBHĀṢYAṬĪKĀ.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 256. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, not old.

Breaks off in the 10th Adhyāya.

In the beginning, the benedictory stanzas and the introductory remarks are omitted.

This is also Ānandagiri's gloss on the Bhāṣya of Śaṅkarācārya.

No. 2057. भगवद्गीताभाष्यसङ्क्षेपः.

BHAGAVADGĪTĀBHĀṢYASAṄKṢĒPAḤ.

Substance, palm-leaf (Śrītāla). Size, 13⅜ × 1¾ inches. Pages, 240 Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

A short commentary on the Bhāṣya of Śaṅkarācārya by Kēśavasākṣibhagavatpāda.

Beginning :

. . . . णशैलेन्द्रगुहामुखविजृम्भणः ।
जयत्यभ्यर्णविघ्नेशः परमात्मा नृकेसरी ॥

मन्दानामपि गीतास्थ(विशेषार्थोऽ)वबुध्यताम् ।
इति श्रीभगवत्पादभाष्यं सङ्क्षिप्यतेऽन्वयै(ः) ॥

नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
अण्ड . . . . . . लोकास्सप्तद्वीपा च मेदिनी ॥

स भगवान् सृष्ट्वेदं जगत्तस्य च स्थितिं चिकीर्षुरग्रे मरीच्यादीन् प्रजापतीन् सनकादियोगीश्वरान् सृष्ट्वा जगतः स्थितिकारणं

वेदोक्तं प्रवृत्तिलक्षणमभ्युदयसाधनमग्निहोत्रादिकं निवृत्तिलक्ष . . . . . श्रेयस्साधनं ज्ञानवैराग्यात्मकं धर्मं ग्राहयामास । तच्च गच्छता कालेनानुष्ठातृणां का(मोद्ग)वान्धीयमानविज्ञानहेतुकेनाधर्मेणाभिभवात् क्षीणप्रायमुपलभ्य पुनरादिकर्ता नारायणो ब्राह्मण(स्य वर्णा)श्रमभेदनिबन्धनस्य संरक्षणाय ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिस्सदा सम्पन्नस्त्रिगुणात्मिकां स्वां(प्रकृतिं) वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि लोकानुग्रहाय देवक्यां(वसु) देवादंशेन सम्भूतो मायादेहवानिव लक्ष्यमाणो धर्मसम्मूढचेत . . . . मर्जुनं तत उद्दिधीर्षुर्द्विविधमपि तं धर्मं वक्ष्यमाणक्रमेणाधिकारिभेदेन व्यवस्थितमु . . . . न यथोपदिष्टं भगवान् वेदव्यासः सर्वज्ञो गीताख्यैस्सप्तभिः श्लोकशतैरुपनिबबन्ध । क (त) स्यास्य महाशास्त्रस्य . . . . . . वेदार्थसारसङ्ग्रहात्मकस्य सङ्क्षेपतः प्रयोजनं सहेतुकं संसारात्यन्तोपरमलक्षणं निश्श्रेयसं . . . . र्थतत्त्वं च वासुदेवाख्यं परं ब्रह्माभिधेयं तदुभयाभिव्यञ्जकस्य प्रसिद्धमेव । इह भगवत्पादै(:) स्पष्टार्थ.

* * * *

प्रज्ञाचक्षुर्बाह्यचक्षुरभावेन बाह्यमर्थं प्रत्यक्षयितुमीनु(मनी)शानोऽभ्याशवर्ति(नं)व्या . . . . . सादात् प्रत्यक्षीकृतपक्षद्वयव्यापारमात्मनोऽभिहितोपदेष्टारं सञ्जयमपृच्छत् ।

(मू.)

धृतराष्ट्र उ(वाच :—)

(ध)र्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

(व्या.)

हे सञ्जय (धर्मस्य) तद्वुद्धेश्चाभिवृद्धिहेतुकतया प्ररोहक्षेत्रे नाम्ना कुरुक्षेत्रे योद्धुकामास्सङ्गता मदीया . . . . . . धनादयः, पाण्डुपुत्रा युधिष्ठिरादयश्च किं कृतवन्तः ॥

End :

(मू.)

"(यत्र योगेश्व)रः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥" इति ॥

(व्या.)

यस्मिन् पक्षे योगानां सर्वेषां कर्मज्ञान . . .

* * * *

तस्मै गुरूणां गुरवे विद्यातीर्थात्मने नमः ॥

Colophon:

* * * *

इति श्रीमत्परम . . . . .

केशवसाक्षिभगवतः कृतौ श्रीभगवद्गीताभाष्यसङ्क्षेपे अष्टादशोऽ-ध्यायः ॥

मलनिर्मोचनं(पुंसां जलस्नानं दिनेदिने) ।
सकृद्गीताम्भसि स्नानं संसारमलमोचनम् ॥
श्रीगीताभाष्यसङ्क्षेपकारु(रि)णीं करुणाकराम् ।
शरणं त्वां प्र . . . .
विद्यारण्यगुरोः कान्तकटाक्षाङ्कुरिता लता ।
नृसिंहभारती नाम कापि मोक्षफलप्रदा ॥
प्रणम्य परमानन्दं सत्यज्ञान . . . . .
लक्ष्मी(नाथहृषीकेशं)पुण्डरीकाक्षमक्षयम् ॥

गीताशास्त्रस्य कर्तारं हर्तारं संसृतेरलम् ।
भर्तारं सर्वभूतानां . . . . . जिष्णुं समाश्रये ॥
(शुभ)स्यायतनीभूतमशुभस्यापहर्तृ च ।
यन्मङ्गलमिति ख्यातं तद्ब्रह्म परमं भजे ॥

No. **2058.** भगवद्गीताभाष्यसङ्क्षेपः.

BHAGAVADGĪTĀBHĀṢYASAṄKṢĒPAḤ.

Substance, paper. Size, $8\frac{1}{8} \times 6\frac{1}{2}$ inches. Pages, 326. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same as the last.

No. **2059.** भगवद्गीताव्याख्या—सुबोधिनी.

BHAGAVADGĪTĀVYĀKHYĀ : SUBŌDHINĪ.

Substance, paper. Size, $12\frac{1}{8} \times 7$ inches. Pages, 148. Lines, 19 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Complete.

This is a commentary on the Bhagavadgītā by Śrīdharasvāmin, pupil of Parānanda.

Beginning :

(मू.)

धृतराष्ट्र उवाच :—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ १ ॥

सञ्जय उवाच :—

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥ २ ॥

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

(व्या.)

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥

शेषाशेषमुखव्याख्याचातुर्यं त्वेकवक्त्रतः ।
दधानमद्भुतं वन्दे परमानन्दमाधवम् ॥ २ ॥

सद्गुरुम् ॥

श्रीमाधवं प्रणम्योमाधवं विश्वेशमादरात् ।
तद्भक्तियन्त्रितः कुर्वे गीताव्याख्यां सुबोधिनीम् ॥

भाष्यकारमतं सम्यक्तद्व्याख्यातृगिरस्तथा ।
यथामति समालोड्य गीताव्याख्यां समारभे ॥

गीता व्याख्यायते यस्याः पाठमात्रादयत्नतः ।
सेयं सुबोधिनी टीका सदा ध्येया मनीषिभिः ॥

इह खलु सकललोकहितावतारः परमकारुणिको भगवान् देवकीनन्दनः तत्त्वाज्ञानविजृम्भितशोकमोहभ्रंशितविवेकतया निजधर्मत्यागपरम्पर(रा)धर्माभिसन्धिमर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकमोहसागरादुद्दधार । तमेव भगवदुपदिष्टमर्थं श्रीकृष्णद्वैपायनस्सप्तभिः श्लोकशतैरुपनिबबन्ध । तत्र च प्रायशः श्रीकृष्णमुखनिस्सृतानेव श्लोकानलिखत् । कांश्चित्तत्सङ्गतये स्वयं व्यरचयत् । तथोक्तं गीतामाहात्म्ये :—

“ गीतास्सुगीताः कर्तव्याः किमन्यैश्शास्त्रसङ्ग्रहैः ।
याः स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृताः ॥ ” इत्यादि ॥

तत्र तावद्धर्मक्षेत्र इत्यादिना विषीदन्निदमब्रवीदित्यन्तेन ग्रन्थेन श्रीकृष्णार्जुनसंवादं(द)प्रस्तावनाय कथा निरूप्यते । भो सञ्जय धर्मभूमौ कुरुक्षेत्रे मत्पुत्राः पाण्डुपुत्राश्च युयुत्सवः योद्धुमिच्छन्तस्सन्तः समवेता मिळितास्सन्तः किं कृतवन्तः ॥ १ ॥

पाण्डवानामनीकं सैन्यं व्यूढं व्यूहरचनया स्थितं दृष्ट्वा द्रोणाचार्यसमीपं गत्वा राजा दुर्योधनः वक्ष्यमाणं वाक्यमुवाच ॥ २ ॥

तदेव वचनमाह पश्येत्यादिनवभिः श्लोकैः—

हे आचार्य पाण्डवानां महतीं विततां चमूं सेनां पश्य । द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूढां व्यूहरचनयाधिष्ठिताम् ॥ ३ ॥

End:

(मू.)

यत्र योगीश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अष्टादशोऽध्यायः ॥

(व्या.)

अतः स्वपुत्राणां राज्यादिशङ्कां परित्यजेत्याशयेनाह । यत्र येषां पक्षे । योगमायेश्वरो हरिः श्रीकृष्णो वर्तते । यत्र च पार्थो गाण्डीवधनुर्धरो वर्तते । तत्रैव श्रीः राज्यलक्ष्मीः तत्रैव.

* * * *

यमेवैष वृणुते तेन लभ्य इत्यादिश्रुतिस्मृतिपुराणवचनान्येवं सति समञ्जसानि भवन्ति । तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति सिद्धम् ॥

तेनैव दत्तया मत्या तद्गीताविवृतिः कृता ।
स एव परमानन्दस्तया प्रीणातु माधवः ॥

श्रीपरानन्दपादाब्जरजश्श्रीधारिणामुना ।
श्रीधरस्वामियतिना कृता टीका सुबोधिनी ॥
स्वप्रागल्भ्यबलाद्विलोड्य भगवद्गीतास्तदन्तर्गतं
तत्त्वं प्रेप्सुरुपैति किं गुरुकृपापीयूषदृष्टिं विना ।
अम्बु स्वाञ्जलिना निरस्य जलधेरादित्सुरन्तर्मणी-
नावर्तेषु न किं निमज्जति जनस्सत्कर्णधारं विना ॥

Colophon :

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां श्रीभीष्मपर्वणि श्रीमद्भगवद्गीतायां श्रीकृष्णार्जुनसंवादे श्रीधरस्वामिकृतौ टीकायां सुबोधिन्यां सकलोपनिषदर्थप्रतिपादकसन्न्यासमोक्षयोगो नाम अष्टादशोऽध्यायः ॥

श्रीमद्भगवद्गीता संपूर्णा ॥

No. 2060. भगवद्गीताव्याख्या—सुबोधिनी.
BHAGAVADGĪTĀVYĀKHYĀ : SUBŌDHINĪ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 131. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same as the last

No. 2061. भगवद्गीताव्याख्या—सुबोधिनी.
BHAGAVADGĪTĀVYĀKHYĀ : SUBŌDHINĪ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 172. Lines, 10 on a page. Character, Telugu. Condition, fair (the right end of leaves are worn out). Appearance, old.

Begins on fol. 1*a*. The other work herein is Viṣṇusahasranāmabhāṣyam 87*a*, Agastyasaṁhitā 145*a*, Rāmapūjāvidhānam 148*a*.

Complete. Same as the last.

No. 2062. भगवद्गीताव्याख्या—सुबोधिनी.

BHAGAVADGĪTĀVYĀKHYĀ: SUBŌDHINĪ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 38. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Breaks off in the 3rd Adhyāya.

Same as the above.

No. 2063. भगवद्गीताव्याख्या—सुबोधिनी.

BHAGAVADGĪTĀVYĀKHYĀ: SUBŌDHINĪ.

Substance, paper. Size, $9 \times 5\frac{7}{8}$ inches. Pages, 306. Lines, 14 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

Same as the above.

दुर्मतिनामसंवत्सरे पुष्यशुद्धैकादश्यां गुरुवासरे भगवद्गीताव्याख्यानं तेकुमल्लश्रीनिवासेन लिखितम् ॥

No. 2064. भगवद्गीता—सुबोधिनीसहिता.

BHAGAVADGĪTĀ WITH THE COMMENTARY SUBŌDHINĪ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 89. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

First four Adhyāyas, complete. Fifth and Sixth, incomplete.

Same as the above.

No. 2065. भगवद्गीताव्याख्या—सुबोधिनी.

BHAGAVADGĪTĀVYĀKHYĀ: SUBŌDHINĪ.

Substance, paper. Size, $10\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 188. Lines, 16 on a page. Character, Telugu. Condition, much injured Appearance, old.

Complete. Same as the above.

No. 2066. भगवद्गीताव्याख्या—सुबोधिनी.

BHAGAVADGĪTĀVYĀKHYĀ : SUBŌDHINĪ.

Substance, palm-leaf (Śrītāla). Size, $14\frac{5}{8} \times 1\frac{3}{4}$ inches. Pages, 144. Lines, 12 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 14*a*. The other work herein is Putrasvīkaraṇavidhiḥ 1*a*.

Complete.

No. 2067. भगवद्गीताव्याख्या—सुबोधिनी.

BHAGAVADGĪTĀVYĀKHYĀ : SUBŌDHINĪ.

Substance, palm-leaf. Size, $14 \times 1\frac{1}{4}$ inches. Pages, 332. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the 15th Adhyāya.

This contains a Telugu translation of the commentary of Śrīdharasvāmin.

No. 2068. भगवद्गीता—पदयोजनाख्यव्याख्यासहिता.

BHAGAVADGĪTĀ WITH THE COMMENTARY CALLED PADAYŌJANĀ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 273. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, not old.

A commentary on the Bhagavadgītā by Rāmacandrānandasarasvatī, pupil of Brahmānandasarasvatī.

Transcribed by Kōlacala Lakṣmīnṛsiṁha, pupil of Vāsudēvasvāmin. Dated the second of Śuklapakṣa in Āṣāḍha in the Virōdhin year.

Beginning:

धृतराष्ट्र उवाच :—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

हे सञ्जय! धर्मक्षेत्रे पुण्यभूमौ कुरुक्षेत्रे मामकाः मत्पुत्राः पाण्डवाः पाण्डुपुत्राश्चैव युयुत्सवः योद्धुमिच्छन्तः समवेताः मिळितास्सन्तः किमकुर्वत किं चक्रुः ॥ १ ॥

सञ्जय उवाच :—

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥

राजा दुर्योधनः । व्यूढम्—व्यूहरचनया स्थितम् ; व्यूहो नाम पद्माद्याकारेण सेनासन्निवेशनम् । पाण्डवानीकम्—पाण्डवसैन्यम् । दृष्ट्वा तदा तस्मिन्काले । आचार्यम्—द्रोणाचार्यम् । उपसङ्गम्य समीपं गत्वा । वचनम्—वक्ष्यमाणं वाक्यम् । अब्रवीत् ।

नवश्लोक्या सुयोधनवचनप्रकारमाह :—

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥

End:

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

यत्र यस्मिन्पक्षे । योगेश्वरः योगमायेश्वरः । श्रीकृष्णः । यत्र यस्मिन्पक्षे । धनुर्धरो गाण्डीवधन्वा । पार्थः तत्र तस्मिन् पाण्डवानां

पक्षे । श्रीः राज्यलक्ष्मीः ध्रुवा स्थिरा, तत्रैव विजयो ध्रुवः, तत्रैव भूतिः श्रियो विशेषविस्तारः ध्रुवा, तत्रैव नीतिः नयः ध्रुवा । इति मम मे मतिः निश्चयः ॥ ७८ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीस्वामिशिष्यरामचन्द्रानन्दसरस्वतीविरचितायां श्रीमद्भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां सकलशास्त्रपदार्थतत्त्वनिर्णयमोक्षयोगो नामाष्टादशोऽध्यायः ॥

यस्सच्छास्त्रनिशातशान्तशकुनैर्दान्तातिदान्तैर्मृगै-
र्ब्रह्माहं चिदहं चिदेकरस एवास्मीति वा पठ्यते ।
यस्यानुग्रहलेशमात्रविभवान्मूकोऽपि वाग्मी भवे-
द्ब्रह्मानन्दसरस्वतीति यतिनां राजा स मे राजते ॥

विरोधिनामसंवत्सराषाढशुक्लद्वितीयायां श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवेन्द्रस्वामिनामन्तेवासिना श्रीमत्कोलचलमान्वयसुधाम्बुधिसुधाकरेण लक्ष्मीनृसिंहेन लिखिता श्रीरामचन्द्रानन्दसरस्वतीविरचिता श्रीमद्भगवद्गीताव्याख्याष्टादशाध्यायिनी समूला सम्पूर्णा ॥

* * * *

नत्वा भास्करकोटिकोटिसदृशं श्रीवासुदेवं हरिं
गीताशास्त्रविवेकतत्त्वरचनाव्याख्या मया लिख्यते ।
यत्पादाब्जनिषेवणादहमपि प्राप्तोऽस्मि सन्मान्यतां
श्रीरामस्य दयानिधेश्च करुणापात्रं पवित्रीकृतः ॥

को वा शङ्करपूज्यपादभगवानाहोऽथ वा तद्गुरु-
र्व्यासो वा शुकमौनिरेव रमते नीलाचले सन्ततम् ।
नानाभिक्षुकरक्षणाय शरणत्राणैकदीक्षागुरु-
र्ब्रह्मानन्दसरस्वतीतिलकया नारायणो वा स्वयम् ॥

No. 2069. भगवद्गीताव्याख्या—पदयोजनिका.

BHAGAVADGĪTĀVYĀKHYĀ: PADAYŌJANIKĀ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 360. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete. Same work as the above.

No. 2070. भगवद्गीताव्याख्या—पदयोजनिका.

BHAGAVADGĪTĀVYĀKHYĀ: PADAYŌJANIKĀ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 215. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete. Same as the above.

No. 2071. भगवद्गीता—गूढार्थदीपिकाव्याख्यासहिता.

BHAGAVADGĪTĀ WITH THE COMMENTARY GŪḌHĀRTHADĪPIKĀ.

Substance, paper. Size, $9\frac{7}{8} \times 4\frac{7}{8}$ inches. Pages, 1,124. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Bound in two volumes.

This is a commentary in accordance with the Advaita-Vēdānta: by Madhusūdanasarasvatī, pupil of Viśvēśvarasarasvatī.

Beginning:

वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्
कृष्णात्परं किमपि तत्त्वमहं न जाने ॥

भगवत्पादभाष्यार्थमालोच्यातिप्रयत्नतः ।
प्रायः प्रत्यक्षरं कुर्वे गीतागूढार्थदीपिकाम् ॥

सहेतुकस्य संसारस्यात्यन्तोपरमात्मकम् ।
परं निश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनम् ॥

सच्चिदानन्दरूपं तत् पूर्णं विष्णोः परं पदम् ।
यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः ॥

कर्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात् ।
तद्रूपाष्टादशाध्यायी गीता काण्डत्रयात्मिका ॥

एकमेकेन षट्केन काण्डमत्रोपलक्षयेत् ।
कर्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः ॥

यतस्समुच्चयो नास्ति तयोरतिविरोधतः ।
भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्तिता ॥

उभयानुगता सा हि सर्वविघ्नापनोदिनी ।
कर्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा ॥

तत्र तु प्रथमे काण्डे कर्मतत्त्यागवर्त्मना ।
त्वंपदार्थो विशुद्धात्मा सोपपत्ति निरूप्यते ॥

द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना ।
भगवान् परमानन्दस्तत्पदार्थोऽवधार्यते ॥

तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम् ।
एवमप्यत्र काण्डानां संबन्धोऽस्ति परस्परम् ॥

End:

यत्र योगीश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

यत्र यस्मिन्युधिष्ठिरपक्षे योगीश्वरः सर्वयोगसिद्धानामीश्वरः सर्वज्ञः सर्वशक्तिर्भगवान् कृष्णः भक्तदुःखकर्षणस्तिष्ठति नारायणः। यत्र पार्थो धनुर्धरः गाण्डीवधन्वा तिष्ठति अर्जुनो नरः। तत्र नरनारायणाधिष्ठिते तस्मिन् युधिष्ठिरपक्षे श्रीः राज्यलक्ष्मीः, विजयः शत्रुपराजयनिमित्त उत्कर्षः, भूतिः उत्तरोत्तरं राज्यलक्ष्म्या विवृद्धिः, ध्रुवा अवश्यंभाविनीति सर्वत्र अन्वयः। नीतिर्नयः एवम्ममेति निश्चयः। तस्माद्वृथा पुत्राविजयाशां त्यक्त्वा भगवदनुग्रहितैः लक्ष्मीविजयादिभाग्भिः पाण्डवैस्सह सन्धिरेव विधीयतामित्यभिप्रायः ॥

* * * *

काण्डत्रयात्मकं शास्त्रं गीताख्यं येन निर्मितम् ।
आदिमध्यान्तषट्केषु तस्मै भगवते नमः ॥

श्रीगोविन्दमुखारविन्दमधुरन्त्विष्टं महाभारते
गीताख्यं परमं रहस्यमृषिणा व्यासेन विख्यापितम् ।
व्याख्यानं भगवत्पदैः प्रतिपदं श्रीशंकरार्यैः पुनः
विस्पष्टं मधुसूदनेन मुनिना स्वज्ञानसिद्ध्यै कृतम् ॥

इह योऽस्ति विमोहयन्मनः परमानन्दघनस्सनातनः ।
गुणदोषभृदेष एव नस्तृणतुल्यो यदयं स्वयञ्जनः ॥

श्रीरामविश्वेश्वरमाधवानां प्रसादमासाद्य मया गुरूणाम् ।
व्याख्यानमेतद्विहितं सुबोधं समर्पितं तच्चरणारविन्दे ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यविश्वेश्वरसरस्वतिपूज्यपादशिष्यश्रीमधुसूदनसरस्वतिविरचितायां भगवद्गीतागूढार्थदीपिकायामष्टादशोऽध्यायः ॥

No. 2072. गीतातात्पर्यबोधिनी.

GĪTĀTĀTPARYABŌDHINĪ.

Substance, paper. Size, $10\frac{3}{4} \times 8\frac{1}{2}$ inches. Pages, 1,147. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Bound in two volumes.

This is a big commentary by Śaṅkarānanda, a pupil of Ānandātman, on the Bhagavadgītā. He seems to have commented on the Upaniṣads also.

Beginning :

सत्यं ज्ञानमनन्तं यन्निष्कलं निष्क्रियं परम् ।
अद्वितीयं निर्विशेषं ब्रह्म सत्यमुपास्महे ॥

अधस्तान्मानवं दिव्यमुपरिष्टाद्गजाकृति ।
परस्तात्तमसस्तेजः पुरस्तादस्तु नस्सदा ॥

पञ्चाशद्वर्णरूपेण यथा व्याप्तमिदं जगत् ।
शब्दब्रह्ममयीं वाणीं भजे तां परदेवताम् ॥

असंसृज्येव प्रकृतिं विकृतिश्च गुणैस्सह ।
यस्सदा भाति मेऽन्तस्थः तं सेवे कृष्णमीश्वरम् ॥

यस्य प्रसादरविणा ध्वान्तमन्तर्विनश्यति ।
तमीशन्दक्षिणामूर्तिमात्मानमहमाश्रये ॥

सनन्दक(नं) श्रीसनकं सनातनं सनत्कुमारञ्च सनत्सुजातम् ।
श्रीवामदेवञ्च शुकं महान्तं नमामि भक्त्या निजबोधसिद्ध्यै ॥

भक्त्या श्रीशङ्कराचार्यं सच्छात्रं सगुरुं मुहुः ।
नमामि शिरसा नित्यं सम्यक् ज्ञानोपपत्तये ॥

भक्त्या प्रणम्य स्वगुरुमानन्दात्मसरस्वतीम् ।
क्रियते श्रीमद्भगवद्गीतातात्पर्यबोधिनी ॥

इह खलु भगवानमिततपोबलतेजश्शक्तिसम्पन्नः सर्वविद्यानिधिस्सर्वज्ञचूडामणिस्साक्षादपरः श्रीमन्नारायणः श्रीकृष्णद्वैपायनः परमकारुणिकाग्रगण्यः स्वयमतिकृपया भविष्यद्विद्वज्जनानामनतिप्रज्ञामाज्ञाय वर्णाश्रमाणां सकलपुरुषार्थसिद्धये तत्सिद्धिसाधनप्रकाशकमनन्तवेदराशिमृगादिभेदेन चतुर्द्धा विभज्य एकैकां शाखां पैलवैशम्पायनादिशिष्यप्रशिष्योपशिष्यपरम्पराद्वारा संवर्द्धयामास ॥

* * * *

तत्रादौ पाण्डवानान्धार्तराष्ट्राणाञ्च युद्धाय सन्नद्धानां प्रवृत्तिं श्रोतुकामो धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

धर्मप्रधानत्वात् धर्मप्रदत्वाद्वा धर्मक्षयात् त्रायत इति वा धर्मक्षेत्रं तस्मिन् धर्मक्षेत्रे वासमात्रेण धर्मतत्फलप्रदे कुरुक्षेत्रे युयुत्सवो युद्धचिकीर्षवोऽत एव समवेतास्समवायम्प्राप्ताः सन्नद्धा मामकाः दुर्योधनादयःपाण्डवाश्च किमकुर्वत किं कार्यं कृतवन्तः ? सञ्जय तद्ब्रूहीत्यर्थः। नन्वत्र युयुत्सव इति विशेषणबलेन समवेतानान्तेषां कर्तव्यङ्कार्यं युद्धमेवेति युद्धस्यैव कर्तव्यत्वे प्रतीयमाने कथं युद्धं प्रवृत्तमिति प्रश्नमुत्सृज्य किमकुर्वत सञ्जयेति धृतराष्ट्रप्रश्नोऽनुपपन्न इति न शङ्कनीयम्; धर्मक्षेत्र इत्युक्तत्वात् तत्क्षेत्रमहिम्ना स्वयमेव धर्मपरो भूत्वा दुर्योधनः तत्पित्र्यं धर्म्यमर्द्धराज्यं तेषान्दत्तवान् वा उत तस्यैव महिम्ना प्रवृद्धधर्मा सन् धर्मपुत्रः स्वजनवधो नरकायेति नरकभयात् युद्धादुपरतो वा अथवा सर्वे युद्धमेव कृतवन्तो वा यत्तत्र वृत्तन्तद्वदेत्युपपन्नतरः प्रश्न इत्यर्थः ॥

End:

ततो ज्ञानयोगस्यैव प्राधान्यं (नं) तु भक्तेर्नापि विरक्तेः

नापि कर्मणो नापि योगस्य ततो ज्ञानयोगस्यैव प्राधान्यमिति सिद्धं सर्वमनवद्यम् ॥

कालकूटसमो दोषो यस्य कर्णे लवायते ।
गुणोऽपि हि कलामात्रो यस्य भूषायते सतः ॥

तमहं पुरुषं वन्दे विद्यादोषहरं हरम् ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वती भगवत्पाद-पूज्यशिष्यश्रीशङ्करानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यामष्टादशोऽध्यायः॥

राक्षसनामसंवत्सरज्येष्ठबहुळनवम्याम् अहङ्कालयप्पकाण्डयाख्येन लि-खितेयं तात्पर्यबोधिनी ॥

No. **2073.** भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, paper. Size, 12½ × 8 inches. Pages, 319. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A commentary on the Bhagavadgītā by Rāmānujācārya in accordance with the Viśiṣṭādvaita-Vēdānta.

Beginning:

वन्दे बृन्दावनचरं वल्लवीजनवल्लभम् ।
जयन्तीसम्भवं धाम वैजयन्तीविभूषणम् ॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमाम्यहम् ॥

श्रियःपतिर्निखिलहेयप्रत्यनिकक्ष्योकैणैक (नीककल्याणैक)तान(:,) स्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपः, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजस्सौशील्यप्रभृत्यसङ्ख्येयकल्याणगुणगणमहोदधिः, स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्य[1]दिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूपः ।

* * * *

पुरुषोत्तमो नारायणो ब्रह्मादिस्थावरान्तमखिलजगत्सृष्ट्वा स्वेन रूपेणावस्थितो ब्रह्मादिदेवमनुष्याणां ध्यानाराधनाद्यगोचरोऽपारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः, स्वयमेव रूपं तत्तज्जातीयसंस्थानं स्वभावमजहदेव कुर्वंस्तेषु लोकेष्ववतीर्य तैस्तैराराधितस्तत्तदधिकारानुरूपं धर्मार्थकाममोक्षाख्यं फलं प्रयच्छन् भूभारावतरणापदेशेन अस्मदादीनामपि समाश्रयणे(णी)यत्वायावतीर्योर्व्यां सकलमनुजनय(न)विषयतां गतः, परापरनिखिलजनमनोनयनहारिदिव्यचेष्टितानि कुर्वन्, पूतनाशकटयमलार्जुनारिष्टप्रलम्बधेनुकासुरकाळीयकेळिकुवलयापीडचाणूरमुष्टिककंसादीन्निहत्य अनवधिकदयासौहार्दानुरागगर्भावलोकनामृतैर्विश्वमाप्याययन्, निरतिशयसौन्दर्यसौशील्यादिगुणगणाविष्कारेणाक्रूरमालाकारादीन् परमभागवतान् कृत्वा पाण्डुतनययुद्धप्रोत्साहनव्याजेन परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतभक्तियोगमेवावतारयामास । तत्र पाण्डवानां कुरूणां च युद्धे स भगवान् पुरुषोत्तमः सर्वेश्वरो जगदुपकृतिमर्त्यः आश्रितवात्सल्यविवशः पार्थं रथिनमात्मानं च सारथिं सर्वलोकसाक्षिकं चकार । एवं ज्ञात्वापि सर्वात्मना धृतराष्ट्रः सुयोधनविजयबुभुत्सया सञ्जयं पप्रच्छ—

(मू.)

धृतराष्ट्र उवाचः—

१. धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ इति ॥

सञ्जय उवाचः—

२. दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥

End :

किमत्र बहुनोक्तेन?

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

यत्र योगेश्वरः—कृत्स्नस्योच्चावचरूपेणावस्थितस्य चेतनस्य वस्तुनो ये स्वभावयोगास्तेषां सर्वेषां योगानामीश्वरः — स्वसङ्कल्पायत्तस्वेतर-समस्तवस्तुरूपस्थितिप्रवृत्तिभेदः । कृष्णो वसुदेवसूनुः । यत्र पार्थो धनुर्धरः तत्पितृष्वसुः पुत्रः तत्पादाम्बुजद्वयैकाश्रयः । तत्र श्रीर्विजयो भूतिर्नीतिश्च । ध्रुवा—निश्चला । इति मतिर्ममेति ॥

Colophon :

इति श्रीमद्रामानुजाचार्यविरचिते श्रीमद्गीताभाष्येऽष्टादशोऽध्यायः ॥
गीताशास्त्रं समाप्तमभूत् ॥

No. 2074. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf. Size, 17 × 1⅝ inches. Pages, 311. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

No. 2075. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 296. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete.

Same as the above.

No. 2076. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 228. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete.

Same as the above.

No. 2077. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf (Śrītāla). Size, $16\frac{3}{8} \times 2\frac{1}{4}$ inches. Pages, 29. Lines, 15 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in the third Adhyāya.

Same as the above.

No. 2078. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, palm-leaf. Size, $19\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 168. Lines, 11 on a page. Character, Grantha. Condition, slightly injured. Appearance, not old.

Begins on fol. 1*a*. The other work herein is Vaiyāsikanyāyamālāsaṅgrahaḥ, two copies, 85*a*.

Complete.

Same as the above.

The copying said to have been finished at about 10 A.M. on Saturday the 8th day of the Kṛṣṇapakṣa in the Kanyā month in the year Vikrama. The scribe's name is given as Pūrṇappāṭṭu Gōpāladāsa, son of Kṛṣṇamācārya.

